श्रीमंगलमूर्त्तयेनमः॥स्वरादि निपातमव्ययं॥स्वरादयश्च निपाताश्चेति समाहारद्वंद्वः॥स्वरिति स्वर्गपरलोकेच॥अंतरिति मध्ये। प्रातरिति प्रत्यूषे। पुनरुअप्रथमे विशेषेच। सनुतरु अंतर्द्धाने। स्वराद्याः पंचरेफांताः॥ उच्चैस् महति। नीचैस् अल्पे। शनैस् क्रियामांद्ये। ऋधक् सत्ये वियोगशीघ्रसामीप्यलाघवेषु अन्ये। ऋते वर्जने। युगपदित्येककाले। आरात् दूरसमीपयोः। पृथक् भिन्ने। ह्यस् गतेऽह्नि। श्वस् अनागतेऽह्नि। दिवादिवसे। रात्राविति निशि। सायमिति निशामुखे। चिरमिति बहुकाले। मनाक् ईषत् ईमो अल्पे। जोषं सुखे मौने च। तूष्णीमिति मौने॥ बहिस् अवस् इमौ बाह्ये॥ समयेति समीपे मध्ये च॥ निकषा अंतिके। स्वयमित्यात्मने त्वर्थे। वृथेति व्यर्थे। नक्तमि

Checked 2012

ACC. NO: ~~529.~~ M 928

Title! - अव्ययानि (संपूर्ण)

Subject:- व्याकरण

पेज :- - 6

1

१

तिरोऽन्तर्धौ। नञ्निषेधे। हन्ताविति निमित्ते। उद्धेति आकथ्ये। अद्धेति स्फुटावधारणयोः। न
न्वाति शमयोरित्येके। सामीत्यर्धजुगुप्सितयोः। वत्तेन तुल्यमित्यादिभिर्विहितो वति
प्रत्ययः। यस्तूपसर्गाच्छंदसि धात्वर्थ इति विहितः स नेह गृह्यते। यदृच्छतो निवतापा
मि। सनासनन्नसनानू एते नामित्यपदं उपघे तिभेदे। तिरस् अंतर्द्धौ तिर्यगर्थपरिभ
वेच। अंतरेण मध्ये विनार्थे च। अंतरेणेति वर्जने। ज्योगिति कालभूयस्त्वे प्रश्ने
शीघ्रार्थे संप्रत्यर्थे च। कमिति वारिमूर्धनिंदासुखेषु। शं सुखे। सहसेत्याक
स्मिकाविमर्शयोः। विनेति वर्जने। नानेत्यनेकविनार्थयोः। स्वस्तीति मंगले॥
स्वधा पितृदाने। अलं भूषणपर्याप्तिशक्तिवारणनिषेधेषु। वषट् वौषट् श्रौ
षट् हविर्दाने। अन्यदित्यन्यार्थे। आस्तीति सत्तायां। उपांश्वित्यप्रकाशे।

१

च्चारणरहस्ययोः। क्षमेति क्षांतौ। विहायसेति वियदर्थे। दोषेति रात्रौ। मृषा
मिथ्येत्येतौ वितथे। कथेति प्रश्ने। पुरेत्यचिरात् चिरातीते भविष्यदासन्ने च। मि
थोमिथसू एतौ रहः सहार्थयोः। प्रायस् इति बाहुल्ये। मुहुस् पुनरर्थे। प्रवाहुकमिति
समकाले ऊर्ध्वार्थे च। प्रवाहिकेति पाठांतरं। आर्यहलमिति बलात्कारे। शाकटाय
नस्त्वर्यमिति प्रतिबंधे। हलमिति प्रतिषेधविवादयोरित्याह। अभीक्ष्णमिति पौ
नःपुन्ये। साकं सार्धं एतौ सहार्थे। नमस्नतौ। हिरुक् वर्जने। धिक् निंदाभर्त्सनयोः
अमुशीघ्रजात्ये च। आम् अंगीकारे। किमेति कुत्सायामिति कास्मत्ययादिभिश्च
विहितप्रत्ययोऽपीह गृह्यते। इत्येके। पपाचतरां कारयामास। प्रतामुं ग्लानौ।
प्रतानुं विस्तारे। प्रशानु समानार्थे। मामाङ् एतौ निषेधाशंकयोः। अह्रुति
त्यादि २

२

२

गणइति।तेनान्येपिज्ञेयाः।तथाहि।काममनुच्छंद्ये।प्रकाममिति अतिशये।भूयइतिपुन
रर्थे।सांप्रतमिति न्याय्ये।परमिति किंतर्थे।साक्षात्प्रत्यक्षे।साकंमितियोगार्थे।सत्य
मित्यंगीकारे।मंक्षुआशु द्युत्योशीघ्र्ये।संवत्वर्षे।अवश्यंनिश्चये।सपदिशीघ्र्ये।
बलवदित्यतिशये।प्रादुस्‌आविस्‌प्रकाशे।अनिशंनित्यदासततेअजस्रंसंततं
एते सातत्ये।उषेतिरात्रौ।रोदसीद्यावापृथवीत्यर्थे।ओमित्यंगीकारेब्रह्मणिच।भू
रितिपृथिव्यां।भुवइत्यंतरिक्षे।झटितिझगितितरसाइतिशीघ्र्ये।सुष्ठुप्रशंसायां।
दुष्टुनिकृष्टे।पूपुजायां।आद्‌आश्चर्ये।कुइतिकुत्सितेपथदर्थयोः।अंजसे
तितत्वशीघ्रार्थयोः।मिथुइतिद्वावित्यर्थे।नानकुशोघ्र्ये।चिरायचिररात्रायाचिर
स्यचिरंचिरेणचिरादयोचेचिरार्थकाः।अस्तमितिविनाशे।आनुपक्‌आनुपूर्व्ये।

२

अनुपक्‌आनुमाने।जनसुद्वीप्रसंप्रतिकपोः।सछोनेइतिपुक्रोवरीमितिईषदुत्कर्षे।सु
दिस्तुकूपक्षेवृदिवृपापक्षे।इत्यादिचितिसमुच्चयान्वाचयेतरेतरयोगस माहार
षु।वास्याद्विकल्पोपमयोरेवार्थेपिसमुच्चये।हेतिप्रसिद्धौ।अहेतिपूजायां।एवेत्य
वधारणेअनवक्लृप्तौच।एवमित्युक्तिकमेशे।नूनमितिनिश्चयेतर्केच।शश्वदितिपो
नःपुन्येनित्येसहार्थेन।युगपदित्येककाले।नूयसपुनरर्थेआधिक्येच।कपदिति
प्रश्नेप्रशंसायांच।कुविदितिभूयर्थप्रशंसायोंच।नेदीत्शंकाप्रतिषेधाविवासमु
च्चयेषुच।चेदितिपक्षार्थे।चणअयनेदर्थेणितु।समुच्चयादोतुअननुबंधः।कच्चि
दितिइष्टप्रश्ने।यत्नेनयनवक्लृप्त्य र्थे।दृक्षेयेषु।नावकल्प्यामिनमर्षयेगर्हे।आ
श्चर्येवायन्नभवान्वृषलंयाजयेत्।नहीतिप्रायारंभे।हंतेतिहर्षेविषादेऽनु
नुकंपायांवाक्यारंभेच।माकिःमाकीनकिरितिप्रयोवर्जने।माङ्नञोस्वरा

१२
२५
पि

6

दिष्टू केै॥ इह याठ स्क निपात वार्थः॥ तेनाकस्मात् नंदंमिष्यातीत्यर्थः॥ तन्नचिंत्यं। फिट्स्वरेणापि
सिद्धेः। यदप्याहुः। सत्वकमनामधेयं ...मं सार्थस्वरादिष्वदंइति नदपिचिंत्यं। लक्ष्मी
वाचकस्यमो पि गुणदृष्ट्या ... वामनेन। तस्मादुभयत्र पाठे फलं चिंत्यं। यावत्तावदेते
साकल्यावधिमानावधारणेषु। साकल्ये यावत्कार्यं तावत्कृतं। अवधौ यावद्भुंक्ते
र्थं तावन्निषेधे। माने यावद्दत्तं तावद्भुक्तं। अवधारणे यावदमत्रं तावत् ब्राह्मणान्
आमंत्रयस्व॥ त्वे विशेषतर्कयोः। द्वैवितर्के। त्वे इति पाठांतरं। रैदाने अनादरे च॥
रैकरोति ददाती त्यर्थः॥ त्वैरे किं करिष्यसि। औषट् वौषट् एतौ ह विर्दाने। स्वाहा देव
ताभ्यो दाने। स्वधेति पितृभ्यः। औषडादीनामनेकाचामुभयत्र पाठः स्वरभेदा
र्थः। तुमिति तुंकारे। गुरुं तुं कृत्य हुंकृत्य। तथाह्रीतिनिदर्शने। खल्वितिनिष
धे वाक्यालंकारे निश्चये च। किलेति वार्तायामलीके च। अथेति मंगला

नंतरारंभप्रश्नकार्त्स्न्याधिकारप्रतिज्ञासमुच्चयेषु। अयं स्वरादिरपि। तेन मंगलवाचकस्य सत्यार्थत्वे
अव्ययत्वं सिध्यति। तथा च श्रीहर्षः। उदस्य कुंभीरथ शातकुंभजाश्चतुष्कचारुत्विषि वेदि
कोदरे। यथाकुलाचारमथावनींद्रजां पुरंध्रिवर्गः स्नपयांबभूव तामिति। अत्र हि अ
थ स्नपयांबभूवेत्यस्य मंगलस्नपनं चकार इत्यर्थः॥ निपातस्य स्वरूपेणैव मंगलत्वम्॥ दंग
ध्वनिवत् सुस्वरश्चार्थः। पातःस्मेति जानीते पादपूरणे च॥ आदहत्यकपक्रमहिंसा
कुत्सनेषु। अवदत्तामिति। इह अनु उपसर्गत्वात्। अचत्वपसर्गात् इति नप्रवर्तते। अहमि
ति सुवंतप्रतिरूपकं। एतेन गत्ये केन चिन्नीतो ग्रामिति व्याख्यातो। कुवामित्यर्थे हि वामित्य
व्ययं। आसीतिति द्रुप्र ... एवमस्मी त्यहमर्थे। वामास्मि वक्ति। आहत्यवान्वेत्यर्थे।
आसेति बभूवेत्यर्थ इत्यादि॥ अरीतिसंबोधने अथेधिक्षेपे निषेधे च॥ आइति वाक्यस्म

२

३

मि ४

च ७

५

४

रणयोः।इसंबोधनजुगुप्साविस्मयेषु।ईईउऊएऐओऔसंबोधने।पशुसम्यगर्थे।पशुमन्यमानाः।
शुकंशैघ्र्ये।यथाकथाचेत्यनादरे।पाट्प्याट्अंगहेहेभोःअयेऐजेसंबोधने।घेतिद्विंसाप्राति
लोम्यपादपूरणेषु।विषुनानार्थे।एकपदेइत्यस्मादित्यर्थे।फत्कुत्सायां।आनइ।नोपीव्यर्थे।
अकृतिगणइति।नथोःथ।यनूतदिहेतो।आहोस्विनुविकल्पे।सीमुसर्वतोभावे।कपादपू
रणे।सुकमतिशये।अनुकंवितर्के।शं।बट्अंतःकरणे।अभिमुखेच।वपादपूरणेइवार्थे

४

च।दिष्ट्येत्यानंदेत्यर्थे।चटुचाटुप्रियेवाक्ये।कुमितिभर्त्सने।इवेतिसादृश्ये।अघेत्वेइतिदु
दानीमित्यर्थेइत्यादि।अत्रेदमवधेयम्।स्वरादिचादिराकृतिगणत्वाविशेषयेषांनिजेपो
स्वरइह्रस्वेत्यादिषुअन्येस्वरादिषुस्वरद्वयमानस्मूमयत्रबोध्यः।यथाउनञाहः।स्व
रादिषुईईयोन्ननेन्तेत्यंनोदानप्रयोगात्॥पस्तुउनञाहस्यस्वरादितामुक्तानि

नि१ पातस्वरमात्राभ्योनोदोर्नवनिपातमाश्रित्यसमादधुस्ताद्भ्रमसात्॥स्वरादेरनिपातत्वात्॥अं

नि२ नोदौनिपातत्वेवैयर्थ्यात्॥यदपिकाशिकायामुक्तं।स्वरूपानेसूकथकूदिवापृथानकं

मित्यादयोनोदात्तइति॥यच्चस्मनातरतिरसुएवमादयअधकदात्ताइतितत्सर्वंश्रामादि

नि२

कं।लक्ष्यविसंवादान्निर्मूलत्वाच्चेतिशब्दकौस्तुभेप्रपंचितं॥तद्धिश्चासर्वविभक्तिः।स
र्वेतिवचनत्रयात्मिकेत्यर्थः।नेति।किंत्वेकवचनमेवोत्पद्यतइतिभावः।तद्धितः।किं।
एकः।द्वौत्रयः।असर्वत्यादिकं।औपगवः।कम्मेजंनः।जीवसेइतितुमर्थे।सेसेनेति
असेप्रत्ययः।पिबध्यैइति।नेनेवेशाध्येप्रत्ययः।पाघ्रेतिपिबादेशः।यत्वाकुः।कर्त
रिशाविनितद्भ्रमसात्॥अव्ययकृतोभावेइतिसिद्धांतात्॥अतएवहागमोपदे
शिकप्रतिपत्यर्थंतेनेदून।श्राधायेकेचिकीर्षवे॥लक्ष्यप्रतिपदोक्तंसंनिपातपरिभा

५

षाभ्यां सिद्धे तयोरनित्यत्वज्ञापनार्थं मे। क्त्वातोसुन्कसुनः। उदेतो रिति। उत्तरपूर्वादिणो भाव लक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्। विसृपइति। सृपितृदोः कसुन्। अवग्र हणमिति। तथा च वार्त्तिके। अव्ययादाप्सुप्रवचनार्थकं यल्लिङ्गाभावादिति सूत्र स्यउक्तिसंभवस्तु स्त्रियामिति सूत्रस्त्रीसमानाधिकरणादिति पक्षं गृहीत्वा बोध्यः। सच्चनच्छिन्नः। भूर्जामियं ब्रह्मणी त्यादावति व्याप्तेः। अलिंगत्वे अथर्वणि विद्या गतश्रुति [illegible] विरोधमाशंक्याह। सदृशमिति॥ लिंगकारकेति विभक्तिवचनशब्दो कारकसंख्यापदावितिभावः। यथा वाचेति। परिगणमित्येके। अन्ये तु उदाहरणमि त्याहुः। स्वगादयइति। आदिरेवाकारालुप्यते। नांत्यः अपिना साहचर्यात्॥ इत्यव्ययानि॥ ॥श्रीसांबसदाशिवार्पणमस्तु॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥शुभं भवतु॥ ॥

6